# ShantikadhyAya from Shivadharmakhya

# શ્રીશિવધર્માખ્યોક્ત શાન્તિકાધ્યાયઃ

## Document Information

Text title : ShantikadhyAya from Shivadharmakhya

File name : shAntikAdhyAya.itx

Category : shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Description-comments : Shivadharmakhya

Latest update : October 20, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# શ્રીશિવધર્માખ્યોક્ત શાન્તિકાધ્યાયઃ

શ્રીગણેશાય નમઃ ।
શ્રીભૈરવાય નમઃ ।
શ્રીનન્દીશાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।

અથ શ્રીશિવધર્માખ્યોક્ત શાન્તિકાધ્યાયઃ પ્રારભ્યતે ।
શ્રી નન્દિકેશ્વર ઉવાચ -
અતઃ પરમિદં ગુહ્યં રુદ્રોદ્ગીતં મહોદયમ્ ।
મહાવિઘ્નપ્રશમનં મહાશાન્તિકરં શુભમ્ ॥ ૧॥

અકાલમૃત્યુશમનં સર્વવ્યાધિનિવારણમ્ ।
પરચક્રપ્રમથનં સદા વિજયવર્ધનમ્ ॥ ૨॥

સર્વદેવગ્રહાનીકં સમભીષ્ટફલપ્રદમ્ ।
સર્વશાન્તાધિકારાખ્યં ધર્મં વક્ષ્યામિ શાશ્વતમ્ ॥ ૩॥

શશાઙ્કાર્દ્ધધરસ્ત્ર્યક્ષો નાગયજ્ઞોપવીતકઃ ।
ચતુર્મુખશ્ચતુર્બાહુઃ સિતભસ્માઽવગુણ્ઠિતઃ ॥ ૪॥

વરો વરેણ્યો વરદો દેવદેવો મહેશ્વરઃ ।
ત્રૈલોક્યનમિતઃ શ્રીમાઞ્છાન્તિમાશુ કરોતુ મે ॥ ૫॥

સર્વાવયવપૂર્ણેન ગાત્રેણ તનુમધ્યમા ।
પીતશ્યામાતિસૌમ્યેન સ્નિગ્ધવર્ણેન શોભના ॥ ૬॥

લલાટે તિલકોપેતા ચન્દ્રરેખાર્ધધારિણી ।
ચિત્રામ્બરધરા દેવી સર્વાઽઽભરણભૂષિતા ॥ ૭॥

વરસ્ત્રીમયરૂપેણ શોભાગુણમહાસ્પદા ।
ભાવનામાત્રસન્તુષ્ટા ઉમાદેવી વરપ્રદા ॥ ૮॥

સાક્ષાદાગત્ય રૂપેણ શાન્તેનાઽમિતતેજસા ।
શાન્તિં કરોતુ મે પ્રીતા ભક્તાનાં ભક્તવત્સલા ॥ ૯॥

પદ્મરાગદ્યુતિઃ સૌમ્યો રક્તમાલ્યાઽનુલેપનઃ ।
અબાલો બાલરૂપેણ ષડ્વક્ત્રઃ શિખિવાહનઃ ॥ ૧૦॥

પૂર્ણેન્દુવદનઃ સૌમ્યસ્ત્રિશિખઃ શક્તિસંયુતઃ ।
કૃત્તિકોમાગ્નિરુદ્રાંશસમુદ્ભૂતઃ સુરાર્ચિતઃ ॥ ૧૧॥

કાર્તિકેયો મહાતેજા વરદાનૈકતત્પરઃ ।
શાન્તિં કરોતુ મે નિત્યં વરં સૌખ્યં ચ મે સદા ॥ ૧૨॥

શ્વેતવસ્ત્રપરીધાનસ્ત્ર્યક્ષઃ કનકસુપ્રભઃ ।
રુદ્રશ્ચૈકો મહાયોગી રુદ્રૈકો હિતમાનસઃ ॥ ૧૩॥

શૂલપાણિર્મહાપ્રાજ્ઞો નન્દીશઃ શિવભાવિતઃ ।
શિવાર્ચનપરો નિત્યઃ શિવધ્યાનૈકતત્પરઃ ॥ ૧૪॥

શાન્તિં કરોતુ મે શાન્તો ધર્મં ચ મતિમુત્તમામ્ ।
મહાદેવ મહાકાયઃ સ્નિગ્ધાઞ્જનચયચ્છવિઃ ॥ ૧૫॥

એકદંષ્ટ્રોત્કટો દેવો ગજવક્ત્રો મહાબલઃ ।
નાગયજ્ઞોપવીતી ચ નાગાઽઽભરણભૂષિતઃ ॥ ૧૬॥

સર્વાર્થસમ્પદાધારો ગણાધ્યક્ષો વરપ્રદઃ ।
ઇન્દ્રસ્ય તનયો દેવો નાયકોઽથ વિનાયકઃ ॥ ૧૭॥

કરોતુ મે મહાશાન્તિં કર્મસિદ્ધિં ચ સર્વદા ।
ઇન્દ્રનીલનિભસ્ત્ર્યક્ષો દીપ્તશૂલાઽઽયુધોદ્યતઃ ॥ ૧૮॥

રક્તામ્બરધરઃ શ્રીમાન્ કૃષ્ણાઙ્ગો નાગભૂષણઃ ।
પાપાઽપનોદમતુલમલક્ષ્મીમલનાશનઃ ॥ ૧૯॥

કરોતુ મે મહાશાન્તિં મહાકાલો મહાબલઃ ।
પીતવસ્ત્રપરીધાના કન્યારૂપા સ્વલઙ્કૃતા ॥ ૨૦॥

ગણમાતાઽમ્બિકા ત્ર્યક્ષા પુણ્યા શાન્તા સુરેશ્વરી ।
સર્વસિદ્ધિકરી દેવી પ્રસાદપરમા પરા ॥ ૨૧॥

શાન્તિં કરોતુ મે માતા સિદ્ધિં ચાઽનુપ્રયચ્છતુ ।
સ્નિગ્ધશ્યામેન વર્ણેન મહામહિષમર્દિની ॥ ૨૨॥

ધનુશ્ચક્રપ્રહરણા ખડ્ગપટ્ટિશધારિણી ।
આતર્જન્યુધતકરા સર્વોપદ્રવનાશિની ॥ ૨૩॥

સર્વમઙ્ગલદાત્રી મે શિવમાચરતુ ધ્રુવમ્ ।
નિર્માંસેન શરીરેણ સ્નાય્વસ્થિષુ નિબન્ધનઃ ॥ ૨૪॥

અતિસૂક્ષ્મોઽતિવિક્રાન્તસ્ત્ર્યક્ષો ભૃઙ્ગિરિટિર્મહાન્ ।
રુદ્રાત્મકો મહાવીરો રુદ્રૈકાહિતમાનસઃ ॥ ૨૫॥

સોઽપિ મે શાન્તિભાવેન શાન્તિમાશુ પ્રયચ્છતુ ।
પ્રચણ્ડગણસૈન્યેશો મહાટઙ્કાક્ષધારકઃ ॥ ૨૬॥

અક્ષમાલાર્પિતકરસ્ત્ર્યક્ષશ્ચણ્ડેશ્વરો વરઃ ।
ચણ્ડપાપાપહરણો બ્રહ્મહત્યાદિશોધકઃ ॥ ૨૭॥ (ચણ્ડસ્તાપાપહરણો)

કરોતુ મે મહાયોગી કલ્યાણાનાં પરમ્પરામ્ ।
શઙ્ખકુન્દેન્દુતુલ્યાભઃ કણ્ઠે મરકતપ્રભઃ ॥ ૨૮॥

અક્ષમાલી શિખાગ્રસ્થઃ સ્વયં જ્ઞાનવ્યવસ્થિતઃ ।
ચતુર્મુખશ્ચતુષ્પાદત્રિનેત્રઃ સર્વદોજ્જ્વલઃ ॥ ૨૯॥

ક્ષિતેઃ પતિર્વૃષો દેવો ધર્મો ધર્મતમો મતઃ ।
ઈશં વહતિ પૃષ્ઠેન તસ્માદ્ધર્મો જગત્પ્રભુઃ ॥ ૩૦॥

વૃષો વૃષવરઃ શ્રીમાન્ કરોતુ મમ શાન્તિકમ્ ।
પદ્માસનઃ પદ્મનિભશ્ચતુર્વદનપઙ્કજઃ ॥ ૩૧॥

કમણ્ડલુધરઃ શ્રીમાન્ દેવગન્ધર્વપૂજિતઃ ।
શિવધ્યાનૈકપરમઃ શિવસદ્ભાવભાવિતઃ ॥ ૩૨॥

બ્રહ્મશબ્દેન દિવ્યેન બ્રહ્મા શાન્તિં કરોતુ મે ।
તાર્ક્ષ્યાસનશ્ચતુર્બાહુઃ શઙ્ખચક્રગદાધરઃ ॥ ૩૩॥

શ્યામઃ પીતામ્બરધરો મહાબલપરાક્રમઃ ।
યજ્ઞદેવોત્તમો દેવો માધવો મધુસૂદનઃ ॥ ૩૪॥

શિવપ્રસાદસમ્પન્નઃ શિવધ્યાનપરાયણઃ ।
સર્વપાપપ્રમથનઃ સર્વાઽસુરનિકૃન્તનઃ ॥ ૩૫॥

સર્વદા શાન્તભાવેન વિષ્ણુઃ શાન્તિં કરોતુ મે ।

અર્હન્તઃ શાન્તરૂપી ચ પિચ્છિસ્કન્ધૈકપાણિકઃ ॥ ૩૬॥

દિગ્વાસા મત્તપઙ્કશ્ચ સૌમ્યચિત્તઃ સમાહિતઃ ।
સંવૃત્તલોચનઃ શાન્તઃ શિવજ્ઞાનૈકચિન્તકઃ ॥ ૩૭॥

શાન્તિં કરોતુ મે શાન્તઃ શિવયોગેન ભાવિતઃ ।
જિતેન્દ્રિયઃ સમાધિસ્થઃ પાત્રચીવરભૂષિતઃ ॥ ૩૮॥

વરદાભયપાણિશ્ચ જ્ઞાનધ્યાનરતઃ સદા ।
યોગવૃષ્ટિસમાયુક્તઃ શિવભાનેન ભાવિતઃ ॥ ૩૯॥

શાન્તિં કરોતુ મે દેવઃ સર્વસત્ત્વહિતે રતઃ ।
પીતવર્ણેન દેહેન હારેણ સુવિચિત્રિતઃ ॥ ૪૦॥

સર્વાઙ્ગસુન્દરી દેવી વિજયા જયકારિણી ।
શિવાઽર્ચનરતા નિત્યં શિવજાપ્યપરાયણા ॥ ૪૧॥

ધરિત્રી લોકમાતા ચ નિત્યં રક્ષાં કરોતુ મે ।
નન્દા ભદ્રા ચ સુરભિઃ સુશીલા સુમનાસ્તથા ॥ ૪૨॥

ક્ષીરોદાદુત્થિતા ગાવો લોકાનાં હિતકામ્યયા ।
પ્રીણયન્તિ સદા દેવાન્ વિપ્રાઁશ્ચૈવાઽવિશેષતઃ ॥ ૪૩॥ (વિપ્રાં)

નિત્યં ચ દેવતાત્માનઃ કુર્વન્તુ મમ શાન્તિકમ્ ।
પદ્મરાગપ્રભા દેવી ચતુર્વદનપઙ્કજા ॥ ૪૪॥

અક્ષમાલાર્પિતકરા કમણ્ડલુધરા શુભા ।
બ્રહ્માણી સૌમ્યવદના શિવપૂજાપરાયણા ॥ ૪૫॥

શાન્તિં કરોતુ મે પ્રીતા બ્રહ્મશબ્દેન સર્વદા ।
હિમશૈલનિભા દેવી મહાવૃષભવાહિની ॥ ૪૬॥

ત્રિશૂલહસ્તા વરદા નાનાઽઽભરણભૂષિતા ।
ચતુર્ભુજા ચતુર્વક્ત્રા ત્રિનેત્રા પાપહારિણી ॥ ૪૭॥

આર્તિં હરતુ મે માતા રુદ્રાણી નિત્યમુજ્જ્વલા ।
મયૂરવાહના દેવી સિન્દૂરારુણવિગ્રહા ॥ ૪૮॥

શક્તિહસ્તા મહારૂપા સર્વાઽલઙ્કારભૂષિતા ।
રુદ્રભક્તા મહાવીર્યા રુદ્રાર્ચનરતા સદા ॥ ૪૯॥

કૌમારી વરદા દેવી શાન્તિમાશુ કરોતુ મે ।
ખડ્ગચક્રગદાહસ્તા શ્યામા પીતામ્બરપ્રિયા ॥ ૫૦॥

ચતુર્ભુજા તાર્ક્ષ્યયાના વૈષ્ણવી સુરપૂજિતા ।
શિવાર્ચનપરા નિત્યં શિવૈકાહિતમાનસા ॥ ૫૧॥

શાન્તિં કરોતુ મે નિત્યં સર્વાઽસુરવિમર્દિની ।
ઐરાવતગજારૂઢા વજ્રહસ્તા મહાબલા ॥ ૫૨॥

નેત્રાણાં તુ સહસ્રેણ ભૂષિતા કનકપ્રભા ।
સિદ્ધગન્ધર્વનમિતા સર્વાલઙ્કારભૂષિતા ॥ ૫૩॥

ઐન્દ્રી દેવી સદાકાલં શાન્તિમાશુ કરોતુ મે ।
વારાહઘોરા વિકટા વરાહવરવાહના ॥ ૫૪॥

શ્યામાવદાતા વિપુલા શઙ્ખચક્રગદાયુધા ।
તર્જયન્તી સદા વિઘ્નાન્નર્ચયન્તી સદાશિવમ્ ॥ ૫૫॥

વારાહી વરદા દેવી ક્ષેમારોગ્યં દદાતુ મે ।
ઊર્ધ્વકેશા કોટરાક્ષી નિર્માંસા સ્નાયુબન્ધના ॥ ૫૬॥

કરાલવદના ઘોરા ખડ્ગકટ્ટારકોદ્યતા ।
કપાલમાલિની ક્રુદ્ધા ખટ્વાઙ્ગવરધારિણી ॥ ૫૭॥

આરક્તપિઙ્ગનયના ગજચર્માઽવગુણ્ઠિતા ।
નાનાનાગોપવીતાઙ્ગી પ્રેતસ્થાનનિવાસિની ॥ ૫૮॥

શિવરૂપેણ ઘોરેણ શિવરાવભયઙ્કરી ।
ચામુણ્ડા ચણ્ડરૂપેણ મહારક્ષાં કરોતુ મે ॥ ૫૯॥

અપીતેન શરીરેણ સર્વાઽઽભરણભૂષિતા ।
આતર્જયન્તી વિઘ્નાનિ જ્વલત્ખટ્વાઙ્ગધારિણી ॥ ૬૦॥

ધ્વાઙ્ક્ષાસના મહાવીરા સર્વપાપપ્રણાશિની ।
લમ્બોષ્ઠી વરદા દેવી શાન્તિમાશુ કરોતુ મે ॥ ૬૧॥

આકાશમાતરી દિવ્યસ્તથાઽન્યાલોકમાતરઃ ।
ભૂતાનાં માતરઃ સર્વાસ્તથાઽન્યેષાઞ્ચ માતરઃ ॥ ૬૨॥

સર્વમાતૃમહાદેવ્યઃ સ્વાયુધા વ્યગ્રપાણયઃ ।
જગદ્વ્યાપ્યાઽવતિષ્ઠન્તે બલિકામા મહોદયાઃ ॥ ૬૩॥

રુદ્રભક્તા મહાવીર્યા રુદ્રાર્ચાઽહિતમાનસાઃ ।
શાન્તિં કુર્વન્તુ મે નિત્યં માતરઃ સુરપૂજિતાઃ ॥ ૬૪॥

યે રુદ્રા રૌદ્રકર્માણો રુદ્રસ્થાનનિવાસિનઃ ।
સૌમ્યાશ્ચૈવ તુ યે કેચિત્ સ્થાણુસ્થાનનિવાસિનઃ ॥ ૬૫॥

માતરો રુદ્રરૂપાશ્ચ ગણાનામધિપાશ્ચ યે ।
વિઘ્નભૂતાસ્તથા ચાઽન્યે દિવિ દિક્ષુ સમાશ્રિતાઃ ॥ ૬૬॥

સર્વે સુપ્રીતમનસઃ પ્રતિગૃહ્ણન્તુ મે બલિમ્ ।
સિદ્ધિમાશુ પ્રયચ્છન્તુ ભયેભ્યઃ પાન્તુ માં સદા ॥ ૬૭॥

ઐન્દ્ર્યાં દિશિ ગણા યે તુ વજ્રહસ્તા મહાબલાઃ ।
સુશ્વેતાક્ષાઃ શ્વેતનિભાસ્તથા વૈ શ્વેતલોહિતાઃ ॥ ૬૮॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
રુદ્રાર્ચનરતા હૃષ્ટા શાન્તિં કુર્વન્તુ મે સદા ॥ ૬૯॥

આગ્નેય્યાં યે ગણાઃ સર્વે શક્તિહસ્તા નિષઙ્ગિણઃ ।
આરક્તાક્ષા રક્તનિભાસ્તથા વૈ રક્તલોહિતાઃ ॥ ૭૦॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
રુદ્રપ્રણામમનસઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૭૧॥

યામ્યાં દિશિ ગણા યે તુ સતતં દણ્ડપાણયઃ ।
કૃષ્ણાઃ કૃષ્ણનિભાઃ ક્રુદ્ધાસ્તથા વૈ કૃષ્ણલોહિતાઃ ॥ ૭૨॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
રુદ્રકા હિતચેતસ્કાઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૭૩॥

નૈરૃત્યાં તુ ગણાઃ ક્રૂરા રાક્ષસાઃ મૃત્યુરૂપિણઃ ।
સુનીલાક્ષા નીલનિભાસ્તથા વૈ નીલલોહિતાઃ ॥ ૭૪॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
રુદ્રધ્યાનૈક નિરતાઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૭૫॥

વારુણ્યાં વૈ ગણા યે તુ સતતં પાશપાણયઃ ।
સુમુક્તાક્ષાઃ મુક્તનિભાઃ વૈ મુક્તલોહિતાઃ ॥ ૭૬॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।

પરમેશાર્ચનરતાઃ કુર્વન્તુ મમ શાન્તિકમ્ ॥ ૭૭॥

વાયવ્યાં વૈ ગણા યે તુ સતતં ધ્વજપાણયઃ ।
સધૂમ્રાક્ષાઃ ધૂમ્રનિભાઃ વૈ ધૂમ્રલોહિતાઃ ॥ ૭૮॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
શિવભક્તિપરાઃ સર્વે ક્ષેમં કુર્વન્તુ મે સદા ॥ ૭૯॥

ઉત્તરસ્યાં ગણા યે તુ સતતં નિધિપાણયઃ ।
સુપીતાક્ષાઃ પીતનિભાઃ તથા વૈ પીતલોહિતાઃ ॥ ૮૦॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
શિવપૂજાસમુદ્યુક્તાઃ ક્ષેમં કુર્વન્તુ સર્વદા ॥ ૮૧॥

ઐશાન્યાં વૈ ગણા યે તુ પ્રશાન્તાઃ શૂલપાણયઃ ।
સુશ્વેતાક્ષાઃ શ્વેતનિભાઃ તથા વૈ શ્વેતલોહિતાઃ ॥ ૮૨॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
શિવપૂજાસમુદ્યુક્તાઃ ક્ષેમં કુર્વન્તુ મે સદા ॥ ૮૩॥

અધોભાગે ગણા યે તુ સતતં ચક્રપાણયઃ ।
ધૂમ્રા ધૂમ્રનિભાઃ સર્વે તથા વૈ ધૂમ્રલોહિતાઃ ॥ ૮૪॥

(var  સુનીલાક્ષાઃ નીલનિભાઃ તથા વૈ નીલલોહિતાઃ)
દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
શિવં કુર્વન્તુ મે નિત્યમલક્ષ્મીમલનાશનમ્ ॥ ૮૫॥

ઊર્ધ્વભાગે ગણા યે તુ મહાબલપરાક્રમાઃ । (var  તુ સતતં પાશપાણયઃ)
સુસૂક્ષ્માક્ષાઃ સૂક્ષ્મનિભાઃ તથા વૈ સૂક્ષ્મલોહિતાઃ ॥ ૮૬॥

દિવ્યાન્તરિક્ષભૌમાશ્ચ પાતાલતલવાસિનઃ ।
શિવપૂજાસમુદ્યુક્તા અશુભાન્નાશયન્તુ મે ॥ ૮૭॥

એતે ગણા મહાત્માનો મહાબલપરાક્રમાઃ ।
શિવં સમ્પૂજ્ય યત્નેન બલિં તેષાં વિનિક્ષિપેત્ ॥ ૮૮॥

તતઃ સુપ્રીતમનસઃ શાન્તિં કુર્વન્તુ સર્વદા ।
અમરાવતી નામ પુરી પૂર્વભાગે વ્યવસ્થિતા ॥ ૮૯॥

વિદ્યાધરસમાકીર્ણા સિદ્ધગન્ધર્વસેવિતા ।
રત્નપ્રકારરુચિરા સર્વરત્નોપશોભિતા ॥ ૯૦॥

તત્ર દેવપતિઃ શ્રીમાન્ વજ્રપાણિર્મહાબલઃ ।
નેત્રાણાં તુ સહસ્રેણ શોભનેન વિરાજતે ॥ ૯૧॥

ઐરાવતગજારૂઢો હેમવર્ણો મહાદ્યુતિઃ ।
દેવેન્દ્રઃ સતતં હૃષ્ટઃ પરમેશાર્ચને રતઃ ॥ ૯૨॥

શિવધ્યાનેન સમ્પન્નઃ શિવભક્તિસમન્વિતઃ ।
શિવપ્રણામપરમઃ કરોતુ મમ શાન્તિકમ્ ॥ ૯૩॥

આગ્નેયે દિગ્વિભાગે તુ પુરી તેજોવતી શુભા । (var  આગ્નેય્યાં)
નાનાદેવગણાકીર્ણા રત્નજ્વાલાસમુજ્જ્વલા ॥ ૯૪॥

તત્ર જ્વાલાપરીતાઙ્ગી દીપ્તાઙ્ગારસમદ્યુતિઃ ।
ભૂતિકૃદ્ દેહિનાં દેવો જ્વલનઃ પાપનાશનઃ ॥ ૯૫॥

શિવપૂજાજપોદ્યુક્તઃ શિવસ્મરણભાવિતઃ ।
શાન્તિઙ્કુરોતુ મે દેવસ્તથા પાપપરિક્ષયમ્ ॥ ૯૬॥

વૈવસ્વતી નામ પુરી દક્ષિણે વૈ વ્યવસ્થિતા ।
લોહપ્રાકરસંયુક્તા પ્રાસાદૈર્ગોપુરૈઃ શુભૈઃ ॥ ૯૭॥

સુરાસુરશતાનીકપિતૃરક્ષોગણાલયા ।
તત્રેન્દ્રો નીલસઙ્કાશો રક્તાન્તાયતલોચનઃ ॥ ૯૮॥

મહામહિષમારૂઢઃ કૃષ્ણસ્રગ્વસ્ત્રભૂષણઃ ।
કાલાન્તકમહાકાલઃ ચણ્ડકોદણ્ડ સંયુતઃ ॥ ૯૯॥

શ્રીમાન્યમો મહાતેજાઃ શિવધર્મપરાયણઃ । (var  અન્તકોઽથ મહાતેજાઃ)
શિવપૂજાસમુદ્યુક્તઃ ક્ષેમારોગ્યં દદાતુ મે ॥ ૧૦૦॥

નૈરૃત્યાસ્તુ દિશો ભાગે પુરી કૃષ્ણેતિ વિશ્રુતા । (var  પુરી કૃષ્ણાવતી શુભા)
મહારક્ષોગણૈઃ કીર્ણા પિશાચભૂતસઙ્કુલા ॥ ૧૦૧॥

તત્ર જીમૂતસઙ્કાશો રક્તસ્રગ્વસ્ત્રભૂષણઃ ।
ખડ્ગપાણિર્મહાતેજાઃ કરાલવદનોજ્જ્વલઃ ॥ ૧૦૨॥

રક્ષોગણેન્દ્રો નિરૃતિઃ શિવાર્ચનરતઃ સદા ।
કરોતુ મે મહાશાન્તિં શિવભક્તિસમુત્સુકઃ ॥ ૧૦૩॥

પશ્ચિમે તુ દિશો ભાગે પુરી શુદ્ધાવતી શુભા ।

નાનારત્નસમાકીર્ણા નાનાકિન્નરશોભિતા ॥ ૧૦૪॥ (var નાનાગણસમાકીર્ણા)

તત્ર મૌક્તિકસઙ્કાશઃ પરિપિઙ્ગલલોચનઃ ।
શુક્લવસ્ત્રપરીધાનઃ પાશહસ્તો મહાબલઃ ॥ ૧૦૫॥

વરુણઃ પરયા ભક્ત્યા શિવેકાહિતમાનસઃ ।
રોગશોકાર્તિસન્તાપં નિત્યં નાશય મે ધ્રુવમ્ ॥ ૧૦૬॥

વાયવ્યે દિગ્વિભાગે તુ પુરી ગન્ધવતી શુભા ।
ઋષિસિદ્ધગણાઽઽકીર્ણા હેમપ્રાકારતોરણા ॥ ૧૦૭॥

તત્ર તામ્રેણ દેહેન કૃષ્ણપિઙ્ગલલોચનઃ ।
પટવ્યામાન્તરાલીનો ધ્વજયષ્ટ્યાયુધોદ્યતઃ ॥ ૧૦૮॥(var નભો વ્યામાન્તરાલીનઃ)

પવનઃ પરમો દેવઃ પરમેશ્વરભાવિતઃ ।
ક્ષેમારોગ્યબલં શાન્તિં કરોતુ સતતં મમ ॥ ૧૦૯॥

મહોદયા નામ પુરી ઉત્તરેણ મહોજ્જ્વલા ।
અનેકયક્ષસઙ્કીર્ણા નાનારત્નોપશોભિતા ॥ ૧૧૦॥

તત્ર દેવો ગદાહસ્તઃ ચિત્રસ્રગ્વસ્ત્રભૂષણઃ । (var શુચિસ્રગ્વસ્ત્રભૂષણઃ)
હ્રસ્વબાહુર્મહાતેજાઃ પરિપિઙ્ગલલોચનઃ ॥ ૧૧૧॥

કુબેરો વરદઃ શ્રીમાન્ હરપાદાર્ચને રતઃ ।
શાન્તિં કરોતુ મે પ્રીતઃ શાન્તઃ શાન્તેન તેજસા ॥ ૧૧૨॥

યશોવતી પુરી રમ્યા ઐશાન્યાં દિશિ સંસ્થિતા । (var ઐશાનીં દિશમાશ્રિતા)
નાનાગણસમાકીર્ણા નાનાસુરકૃતાલયા ॥ ૧૧૩॥

તેજઃ પ્રાકારપર્યન્તા નિરૌપમ્યા મહોદયા ।
તત્ર મૌક્તિકસઙ્કાશઃ શશાઙ્કકૃતભૂષણઃ ॥ ૧૧૪॥

ત્રિનેત્રઃ શાન્તરૂપાત્મા અક્ષમાલાધરઃ સદા ।
ઈશાનઃ પરમો દેવઃ સર્વદેવોત્તમોત્તમઃ ।
સોઽપિ સર્વાત્મભાવેન શાન્તિમાશુ પ્રયચ્છતુ ॥ ૧૧૫॥

ભૂર્લોકેઽથ ભુવર્લોકે સ્વર્લોકે નિવસન્તિ યે । (var સ્વર્લોકે ઽપિ ચ સંસ્થિતઃ)
દેવા દિવ્યપ્રભાયુક્તાઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૧૧૬॥

જનલોકે મહર્લોકે તપોલોકે સ્થિતાશ્ચ યે ।
તેઽપિ પ્રમુદિતા દેવાઃ શિવં કુર્વન્તુ મે સદા ॥ ૧૧૭॥

સત્યલોકે ચ યે દેવાઃ પ્રભાવોજ્જ્વલવિગ્રહાઃ ।
શિવભક્તાઃ સુમનસો ભયં નિર્ણાશયન્તુ મે ॥ ૧૧૮॥

ગિરિકન્દરદુર્ગેષુ વનેષુ નિવસન્તિ યે ।
રુદ્રાર્ચનપરા દેવા રક્ષાં કુર્વન્તુ મે સદા ॥ ૧૧૯॥

મહાતલે ચ યે સન્તિ સંસ્થિતાશ્ચ રસાતલે ।
તલાતલે ચ યે સન્તિ ઉત્તમાઃ સુતલે જનાઃ ॥ ૧૨૦॥

વિતલે સંસ્થિતાઃ ભૂતા અતલે નિવસન્તિ યે ।
તલે ચ નિલયો યેષાં રક્ષાં કુર્વન્તુ સર્વદા ॥ ૧૨૧॥

શરચ્ચન્દ્રાંશુગૌરેણ દેહેનાઽમલતેજસા ।
સરસ્વતી શિવેભક્તા શાન્તિમાશુ કરોતુ મે ॥ ૧૨૨॥

ચારુચામીકરચ્છાયા સરોજકરપલ્લવા ।
શિવભક્તા ચ શ્રીર્દેવી શ્રીસદ્ભૂતિં દદાતુ મે ॥ ૧૨૩॥

ચારુણા મુખચન્દ્રેણ વિચિત્રકુસુમોજ્જ્વલા ।
જયા દેવી શિવે ભક્તા સર્વ કામં દદાતુ મે ॥ ૧૨૪॥

હારેણ સુવિચિત્રેણ ભાસ્કરોજ્જ્વલતેજસા । (var  ભાસ્વત્કનક મેખલા)
અપરાજિતા શિવેભક્તા કરોતુ વિજયં મમ ॥ ૧૨૫॥

સિન્દૂરારુણ રક્તાઙ્ગઃ કર્ણાન્તાયત લોચનઃ ।
સહસ્રકિરણઃ શ્રીમાન્ સમાશ્વકૃતવાહનઃ ॥ ૧૨૬॥

ગભસ્તિમાલી ભગવાશિવપૂજાપરાયણઃ ।
કરોતુ મે મહાશાન્તિં ગ્રહપીડાં વ્યપોહતુ ॥ ૧૨૭॥

જગદાપ્યાયનકરો હ્યમૃતાધારશીતલઃ ।
સોમઃ સૌમ્યેન ભાવેન ગ્રહપીડાં વ્યપોહતુ ॥ ૧૨૮॥

પદ્મરાગનિભા નેનાઽપિ દેહેનાપિઙ્ગલલોચનઃ ।
(var  પદ્મરાગનિભાઙ્ગેન કરિપિઙ્ગલલોચનઃ ।)
અઙ્ગારકઃ શિવેભક્તો રુદ્રાર્ચન પરાયણઃ ॥ ૧૨૯॥

રુદ્રસદ્ભાવસમ્પન્નો રુદ્રધ્યાનૈકમનસઃ ।
ગ્રહપીડા ભયં સર્વં વિનાશયતુ મે સદા ॥ ૧૩૦॥

કુઙ્કુમચ્છવિદેહેન ચારુદ્યુત્કરતઃ સદા ।
શિવભક્તો બુધઃ શ્રીમાન્ ગ્રહપીડાં વ્યપોહતુ ॥ ૧૩૧॥

ધાતુ ચામીકરચ્છાયઃ સર્વજ્ઞાનકૃતાલયઃ । (var  તપ્ત ચામીકરચ્છાયઃ)
બૃહસ્પતિઃ સદાકાલમીશાનાર્ચનતત્પરઃ ॥ ૧૩૨॥

સોઽપિ મે શાન્તચિત્તેન પરમેણ સમાહિતઃ ।
ગ્રહપીડાં વિનિર્જિત્ય કરોતુ વિજયં સદા ॥ ૧૩૩॥

હિમકુન્દેન્દુતુલ્યાભઃ સુરદૈત્યેન્દ્રપૂજિતઃ ।
શુક્રઃ શિવાર્ચનરતો ગ્રહપીડાં વ્યપોહતુ ॥ ૧૩૪॥

ભિન્નાઞ્જનચયચ્છાયઃ સરક્તનયનદ્યુતિઃ ।
શનૈશ્ચરઃ શિવેભક્તો ગ્રહપીડાં વ્યપોહતુ ॥ ૧૩૫॥

નીલાઞ્જનનિભઃ શ્રીમાન્ સૈંહિકેયો મહાબલઃ ।
શિવપૂજાપરો રાહુગ્રહપીડા વ્યપોહતુ ॥ ૧૩૬॥

ધૂમ્રાકારો ગ્રહઃ કેતુરૈશાન્યાં દિશિ સંસ્થિતઃ ।
વર્તુલોઽતીવ વિસ્તીર્ણલોચનૈશ્ચ વિભીષણઃ ॥ ૧૩૭॥

પલાશધૂમ્રસઙ્કાશો ગ્રહપીડાઽપકારકઃ ।
ઘોરદંષ્ટ્રાકરાલશ્ચ કરોતુ વિજયં મમ ॥ ૧૩૮॥

ખડ્ગખેટકહસ્તશ્ચ વરેણ્યો વરદઃ શુભઃ ।
શિવભક્તશ્ચાઽગ્રજન્મા ગ્રહપીડાં વ્યપોહતુ ॥ ૧૩૮॥

એતે ગ્રહા મહાત્માનો મહેશાર્ચનભાવિતાઃ ।
શાન્તિં કુર્વન્તુ મે હૃષ્ટાઃ સદાકાલં હિતૈષિણઃ ॥ ૧૩૯॥

મુખે યસ્યાઃ સ્થિતો મૃત્યુર્વિષ્ટિર્નામ મહાબલઃ ।
સમ્મુખે વિઘ્નકર્ત્રી ચ પુચ્છે તુ વિજયઙ્કરી ॥ ૧૪૦॥

રુદ્રપ્રણામપરમા શાન્તિમાશુ કરોતુ મે ।
તૃતીયા સપ્તમી ચૈવ દશમી ચ ચતુર્દશી ॥ ૧૪૧॥

ચતુર્થી હ્યષ્ટમી ચૈવ એકાદશી ચ પૂર્ણિમા ।
એતેષુ વિઘ્નપાતેષુ કૃષ્ણશુક્લસમાહ્વયાઃ ॥ ૧૪૨॥

નાશયન્તુ ભયં નિત્યં કુર્વન્તુ વિજયં મમ્ ।
અમાવસ્યા મહાપુણ્યા પિતૃદેવસમન્વિતા ॥ ૧૪૩॥

શાન્તા હ્યેષા મહાપુણ્યા શિવસ્ય ચ મહાપ્રિયા ।
શિવતેજઃ સમાયુક્તા કરોતુ વિજયં મમ્ ॥ ૧૪૪॥

પ્રતિપદ્વહ્નિ સંયુક્તા દ્વિતીયા ચ વિધિદૈવતા । (var દ્વિતીયાકોધિદેવતા)
તૃતીયા ચ મહાપુણ્યા ધનદેન સમન્વિતા ॥ ૧૪૫॥

ચતુર્થી ચ મહાપુણ્યા ગજવક્ત્રાધિદૈવતમ્ ।
પઞ્ચમી શ્રીયુત નિત્યં ષષ્ઠી ચ સ્કન્દાધિદૈવતમ્ ॥ ૧૪૬॥

સપ્તમી રવિ સંયુક્તા હ્યષ્ટમી રુદ્રદૈવતા ।
તિથિઃ શૂલભૃતશ્ચૈવ પાપહા પરમા સ્મૃતા ॥ ૧૪૭॥

નવમી તિથિરત્યુગ્રા દુર્ગાયાઃ પરિકીર્તિતા ।
દશમી યમસંયુક્તા ચૈન્દ્રેણૈકાદશી યુતા ॥ ૧૪૮॥

દ્વાદશી વિષ્ણુસંયુક્તા મદનેન ત્રયોદશી ।
ચતુર્દશી મહાવીર્યા તિથિઃ શઙ્કરભાવિતા ॥ ૧૪૯॥

પૂર્ણિમા પરિપૂર્ણાત્મા તિથયઃ સતતોજ્જ્વલાઃ ।
(var ચતુર્દશી મહેશેન પૌર્ણમાસી હિમાંશુના ।)
સતતં ચ શુભાત્માનસ્તિથયશ્ચ ક્રમેણ તુ ॥ ૧૫૦॥

પક્ષદ્વયે સદા હ્યેતાશ્ચન્દ્રગત્યાઽનુગામિનઃ ।
શાન્તિં કુર્વન્તુ મે નિત્યં શિવજ્ઞાનવિધાયિનઃ ॥ ૧૫૧॥

વિષ્કુમ્ભઃ પ્રીતિરાયુષ્માન્ સૌભાગ્યઃ શોભનસ્તથા ।
અતિગણ્ડઃ સુકર્મા ચ ધૃતિઃ શૂલસ્તથૈવ ચ ॥ ૧૫૨॥

ગણ્ડોવૃદ્ધિઃ ધ્રુવશ્ચૈવ વ્યાઘાતો હર્ષણસ્તથા ।
વજ્રઃ સિદ્ધિર્વ્યતીપાતો વરીયાન્ પરિઘઃ શિવઃ ॥ ૧૫૩॥

સિદ્ધિઃ સાધ્યઃ શુભઃ શુક્લો બ્રહ્મા ઐન્દ્રશ્ચ વૈધૃતિઃ ।
ચન્દ્રાભાનોશ્ચ હ્યુત્પન્ના યોગાશ્ચૈતે મહાબલાઃ ॥ ૧૫૪॥

શિવભક્તિપરાઃ સર્વે શિવજ્ઞાનવિધાયિનઃ ।
શાન્તિ કુર્વન્તુ મે નિત્યં તથા કિલ્વિષનાશનમ્ ॥ ૧૫૫॥

કૃત્તિકા પરમા દેવી રોહિણી રુચિરાનના ।
શ્રીમાન્ મૃગશિરા ભદ્રા આર્દ્રા ચ પરમોજ્જ્વલા ॥ ૧૫૬॥

પુનર્વસુસ્તથા પુષ્ય આશ્લેષાઽથ મહાબલા ।
નક્ષત્રમાતરો હ્યેતાઃ પ્રભામાલાવિભૂષિતાઃ ॥ ૧૫૭ ॥

મહાદેવાઽર્ચને શક્તા મહાદેવાઽનુભાવિતઃ ।
પૂર્વભાગે સ્થિતા હ્યેતાઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૧૫૭ ॥

મઘા સર્વગુણોપેતા પૂર્વા ચૈવ તુ ફાલ્ગુની ।
ઉત્તરા ફાલ્ગુની શ્રેષ્ઠા હસ્તા ચિત્રા તથોત્તમા ॥ ૧૫૮ ॥

સ્વાતી વિશાખા વરદા દક્ષિણસ્થાનસંસ્થિતાઃ ।
અર્ચયન્તિ સદાકાલં દેવં ત્રિભુવનેશ્વરમ્ ॥ ૧૫૯ ॥

નક્ષત્રમારો હ્યેતાસ્તેજસાપરિભૂષિતાઃ ।
મમાઽપિ શાન્તિકં નિત્યં કુર્વન્તુ શિવચોદિતાઃ ॥ ૧૬૦ ॥

અનુરાધા તથા જ્યેષ્ઠા મૂલમૃદ્ધિબલાન્વિતમ્ । (var મૂલા ઋદ્ધિબલાન્વિતતા ।)
પૂર્વાષાઢા મહાવીર્યા આષાઢા ચોત્તરા શુભા ॥ ૧૬૧ ॥

અભિજિન્નામ નક્ષત્રં શ્રવણઃ પરમોજ્જ્વલઃ ।
એતાઃ પશ્ચિમતો દીપ્તા રાજન્તે રાજમૂર્તયઃ ॥ ૧૬૨ ॥

ઈશાનં પૂજયન્ત્યેતાઃ સર્વકાલં શુભાઽન્વિતાઃ ।
મમ શાન્તિં પ્રકુર્વન્તુ વિભૂતિભિઃ સમન્વિતાઃ ॥ ૧૬૩ ॥

ધનિષ્ઠા શતભિષા ચ પૂર્વાભાદ્રપદા તથા ।
ઉત્તરાભાદ્રરેવત્યાવશ્વિની ચ મહર્ધિકા ॥ ૧૬૪ ॥

ભરણી ચ મહાવીર્યા નિત્યમુત્તરતઃ સ્થિતાઃ ।
શિવાર્ચનપરા નિત્યં શિવધ્યાનૈકમાનસાઃ ॥ ૧૬૫ ॥

શાન્તિં કુર્વન્તુ મે નિત્યં સર્વકાલં શુભોદયાઃ ।
મેષો વૃષાઽધિપઃ સિંહો ધનુર્દીપ્તિમતાં વરઃ ॥ ૧૬૬ ॥

પૂર્વ ભાગે સ્થિતા યેતે શિવપૂજાપરાયણાઃ ।
શાન્તિં કુર્વન્તુ મે નિત્યં હર્પાદબ્જપૂજકાઃ ॥ ૧૬૭ ॥

વૃષશ્ચ કન્યા દેવી ચ મકરશ્ચાઽપિ ઋદ્ધિમાન્ ।
એતે દક્ષિણભાગે તુ પૂજયન્તિ સદા શિવમ્ ॥ ૧૬૮ ॥

ભક્ત્યા પરમયા નિત્યં શાન્તિં કુર્વન્તુ મે સદા ।
મિથુનશ્ચ તુલા કુમ્ભઃ પશ્ચિમેન વ્યવસ્થિતાઃ ॥ ૧૬૯ ॥

શિવપાદાર્ચનરતાઃ ક્ષેમં કુર્વન્તુ મે સદા ।
કર્કટો વૃશ્ચિકો મીન એતે ઉત્તરમાસ્થિતાઃ ॥ ૧૭૦॥

પૂજયન્તિ સદાકાલં રુદ્રમ્ભુવનનાયકમ્ ।
શાન્તિં કુર્વન્તુ મે નિત્યં શિવાજ્ઞાઽનુવિધાયિનઃ ॥ ૧૭૧॥

બવશ્ચ (બબશ્ચ) બાલવશ્ચૈવ કૌલવસ્તૈતિલસ્તથા ।
ગરો વણિક્ તથા વિષ્ટિશ્ચતુષ્પાચ્છકુનિસ્તથા ॥ ૧૭૨॥

નાગઃ કિંસ્તુઘ્ન ઇત્યેવ કરણાઃ શિવભાવિતાઃ ।
સર્વે સુપ્રીતમનસઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૧૭૩॥

જન્મ સમ્પદ્વિપચ્ચૈવ ક્ષેપપ્રત્યરિસાધકાઃ ।
વધો મૈત્રોઽતિમૈત્રશ્ચ એતે વૈ તારકાગણાઃ ॥ ૧૭૪॥

શિવભક્તાઃ સુમનસઃ કુર્વન્તુ મમ શાન્તિકમ્ ।
ઋષયઃ સપ્તવિખ્યાતા ધ્રુવાન્તાઃ પરમોજ્જ્વલાઃ ॥ ૧૭૫॥

શિવપ્રસાદસમ્પન્નાઃ શાન્તિં કુર્વન્તુ મે સદા ।
કશ્યપો ગાલવો ગાર્ગ્યો વિશ્વામિત્રો મહામુનિઃ ॥ ૧૭૬॥

મુનિર્દક્ષોવસિષ્ઠોઽથ મૃકણ્ડુઃ પુલહઃ ક્રતુઃ ।
અસિતો બાલખિલ્યાશ્ચ દુર્વાસાઃ પિપ્પલાદયઃ ॥ ૧૭૭॥

ઋચીકો ભરતોઽગસ્ત્યઃ પરાશર્યો વિભાણ્ડકઃ ।
માતઙ્ગો જૈમિનિર્વ્યાસો દેવલો દર્ભરોમકઃ ॥ ૧૭૮॥

માણ્ડવ્યશ્ચ દધીચિશ્ચ માર્કણ્ડેયોઽથ ગૌતમઃ ।
નારદો ભૃગુરાત્રેયો ભારદ્વાજોઽઙ્ગિરા મુનિઃ ॥ ૧૭૯॥

વાલ્મીકિઃ કૌશિકઃ કણ્વઃ શાકલ્યોઽથ(જાબાલ્યોઽથ) પુનર્વસુઃ ।
શાલઙ્કાયન ઇત્યાદ્યા ઋષયોઽથ મહાવ્રતાઃ ॥ ૧૮૦॥

શિવધ્યાનાર્ચને યુક્તાઃ શાન્તિં કુર્વન્તુ મે સદા ।
ઋષિપત્ન્યો મહાપુણ્યાસ્તથા ઋષિકુમારિકાઃ ॥ ૧૮૧॥

શિવાર્ચનપરા નિત્યં શાન્તિં કુર્વન્તુ મે સદા
સિદ્ધાઃ સંસિદ્ધતપસો ગણા વિદ્યાધરા ગ્રહાઃ ॥ ૧૮૨॥

મહાત્માનો મહોત્સાહા ગરુડાશ્ચ મહર્દ્ધિકાઃ ।

મહેશ્વરપરા હ્યેતે મહેશં પાદપૂજકાઃ ॥ ૧૮૩॥

સિદ્ધિમાશુ પ્રયચ્છન્તુ આશીર્વાદપરાયણાઃ ।
નમુચિર્દૈત્યરાજેન્દ્રઃ શઙ્કુકર્ણો મહાબલઃ ॥ ૧૮૪॥

મહાનાદોઽથ વિખ્યાતો દૈત્યઃ પરમવીર્યવાન્ ।
હાટકેશ્વરદેવસ્ય નિત્યં પૂજાપરાયણાઃ ॥ ૧૮૫॥

બલં વીર્યઞ્ચ મે ક્ષિપ્રં પ્રયચ્છન્તુ મહર્દ્ધિકાઃ ।
મહાજૃમ્ભો(મહાજમ્ભો) હયગ્રીવઃ પ્રહ્લાદાઽવ્યક્તહ્લાદકઃ ॥ ૧૮૬॥

તારકોઽગ્નિમુખો દૈત્યઃ કાલનેમિર્મદોત્કટઃ ।
એતે દૈત્યા મહાત્માનઃ શિવસદ્ભાવભાવિતાઃ ॥ ૧૮૭॥

પુષ્ટિ બલં તથા વીર્યં પ્રયચ્છન્તુ સુખોદયમ્ ।
વિરોચનો હિરણ્યાક્ષઃ સુપર્વા ચ સુલોમકઃ ॥ ૧૮૮॥

મુચુકુન્દઃ સુકુન્દશ્ચ દૈત્યો રૈવતકસ્તથા ।
ભાવેન ચ પરેણાઽઽશુ યજન્તે સર્વદા શિવમ્ ॥ ૧૮૯॥

સતતઞ્ચ ગુણાત્માનં પુષ્ટિં કુર્વન્તુ મે સદા ।
દૈત્યપત્ન્યો મહાભાગા દૈત્યાનાં કન્યકાઃ શુભાઃ ॥ ૧૯૦॥

કુમારાશ્ચૈવ દૈત્યાનાં શાન્તિં કુર્વન્તુ મે સદા
આરક્તેન શરીરેણ રક્તાન્તાયતલોચનઃ ॥ ૧૯૧॥

મહાભોગકૃતાટોપઃ શઙ્ખાબ્જકૃતલાઞ્છનઃ ।
અનન્તો નાગરાજેન્દ્રઃ શિવપાદાર્ચને રતઃ ॥ ૧૯૨॥

મહાપાપવિષં હત્વા શાન્તિમાશુ કરોતુ મે ।
સુશ્વેતેન તુ દેહેન સુશ્વેતોત્પલશેખરઃ ॥ ૧૯૩॥

ચારુભોગકૃતાટોપો હારચારુવિભૂષણઃ ।
વાસુકિર્નામ નાગેન્દ્રો રુદ્રપૂજાપરો મહાન્ ॥ ૧૯૪॥

મહાપાપં વિષં હત્વા શાન્તિમાશુ (શાન્તિં આશુ) કરોતુ મે ।
અતિપીતેન દેહેન વિસ્ફુરદ્ભોગસમ્પદા ॥ ૧૯૫॥

તેજસાચાઽતિદીપ્તેન કૃતઃ સ્વસ્તિકલાઞ્છનઃ ।
નાગરાટ્ તક્ષકઃ શ્રીમાન્નાગકોટ્યાસમન્વિતઃ ॥ ૧૯૬॥

કરોતુ મે મહાશાન્તિં સર્વદોષવિષાવહઃ ।
અતિકૃષ્ણેન વર્ણેન સ્ફુટો વિકટમસ્તકઃ ॥ ૧૯૭॥

કણ્ઠે રેખાત્રયોપેતો ઘોરદંષ્ટ્રાયુધોદ્ધતઃ ।
કર્કોટકો મહાનાગો વિષદર્પબલાઽન્વિતઃ ॥ ૧૯૮॥

વિષશસ્ત્રાગ્નિસન્તાપં હત્વા શાન્તિં કરોતુ મે ।
પદ્મવર્ણેન દેહેન ચારુપદ્માયતેક્ષણઃ ॥ ૧૯૯॥

પઞ્ચબિન્દુકૃતાભાસો ગ્રીવાયાં શુભલક્ષણઃ ।
ખ્યાતઃ પદ્મો મહાનાગો હરપાદાર્ચને રતઃ ॥ ૨૦૦॥

કરોતુ મે મહાશાન્તિં મહાપાપં વિષક્ષયમ્ ।
પુણ્ડરીકનિભેનાઽપિ દેહેનાઽમિતતેજસા ॥ ૨૦૧॥

શઙ્ખશૂલાબ્જરુચિરૈર્ભૂષિતો મૂર્ધ્નિ સર્વદા ।
મહાપદ્મો મહાનાગો નિત્યં પશુપતૌ રતઃ ॥ ૨૦૨॥

વિનિર્ધૂત(વિનિહત્ય) વિષં ઘોરં શાન્તિમાશુ કરોતુ મે ।
શ્યામેન દેહભારેણ શ્રીમત્કમલલોચનઃ ॥ ૨૦૩॥

વિષદર્પબલોન્મત્તો ગ્રીવાયામેકરેખયા ।
શઙ્ખપાલઃ શ્રિયા દીપ્તઃ શિવપાદાબ્જપૂજકઃ ॥ ૨૦૪॥

મહાવિષં મહાપાપં હત્વા શાન્તિં કરોતુ મે ।
અતિગૌરેણ દેહેન ચન્દ્રાર્ધકૃતમસ્તકઃ ॥ ૨૦૫॥

દીપ્તભોગકૃતાટોપઃ શુભલક્ષણલક્ષિતઃ ।
કુલિકો નાગરાજેશો નિત્યં હરપરાયણઃ ॥ ૨૦૬॥

અપહૃત્ય વિષં ઘોરં કરોતુ મમ શાન્તિકમ્ ।
અન્તરિક્ષે ચ યે નાગા યે નાગાઃ સ્વર્ગસંસ્થિતાઃ ॥ ૨૦૭॥

ગિરિકન્દરદુર્ગેષુ યે નાગા ભૂમિસંસ્થિતાઃ ।
પાતાલે યે સ્થિતા નાગાઃ સર્વેપ્યન્યે સમાહિતાઃ ॥ ૨૦૮॥

રુદ્રપાદાર્ચને શાન્તાઃ કુર્વન્તુ મમ શાન્તિકમ્ ।
નાગિન્યો નાગપત્ન્યશ્ચ તથા કન્યાઃ કુમારિકાઃ ॥ ૨૦૯॥

શિવભક્તાઃ સુમનસઃ શાન્તિં કુર્વન્તુ મે સદા ।
યદિદં નાગસંસ્થાનં કીર્તનાચ્છ્રવણાદપિ ॥ ૨૧૦॥

ન તં સર્પા વિહિંસન્તિ ન વિષં ક્રમતે સદા ।
ચિન્તિતં સિધ્યતે(લભ્યતે) નિત્યં તથા પાપપરિક્ષયઃ ॥ ૨૧૧॥

સિદ્ધિમાશુ પ્રયચ્છન્તિ સર્વવિઘ્ન વિવર્જિતાઃ ।
ગઙ્ગા પુણ્યા મહાદેવી યમુના નર્મદા નદી ॥ ૨૧૨॥

ગોમતી તાપ્તી(તપ્તી) કાવેરી વરુણા દેવિકા તથા ।
સર્વભૂતપતિં દેવં પરમેશં મહેશ્વરમ્ ॥ ૨૧૩॥

પૂજયન્તિ મહાનદ્યઃ શિવસદ્ભાવભાવિતાઃ ।
શાન્તિં કુર્વન્તુ મે નિત્યં તથા પાપપરિક્ષયમ્ ॥ ૨૧૪॥

સિદ્ધિમાશુ પ્રયચ્છન્તુ સર્વવિઘ્ન વિવર્જિતમ્ ।
ચન્દ્રભાગા મહાપુણ્યા નદી ગોદાવરી શુભા ॥ ૨૧૫॥

સરયૂર્ગણ્ડકી શ્રેષ્ઠા કૌશિકી ચ સરસ્વતી ।
ઇમા નદ્યો મહાભાગાઃ શિવપાદાર્ચને રતાઃ ॥ ૨૧૬॥

શાન્તિં કુર્વન્તુ મે નિત્યં શિવધ્યાનૈકમાનસાઃ ।
નૈરઞ્જના નામ નદી શોણશ્ચાઽપિ મહાનદઃ ॥ ૨૧૭॥

મન્દાકિની ચ પરમા તથા સન્નિહિતાઃ શુભાઃ ।
ઇમાશ્ચાઽન્યાશ્ચ યા નદ્યઃ ભુવિ દિવ્યન્તરિક્ષગાઃ ॥ ૨૧૮॥

રુદ્રાર્ચનપરા નદ્યઃ કુર્વન્તુ મમ શાન્તિકમ્ ।
ગુહ્યાનિ યાનિ તીર્થાનિ આસમુદ્રાત્સરંસિ ચ ॥ ૨૧૯॥

કુર્વન્તુ શાન્તિકં તાનિ શ્રીકણ્ઠાધિષ્ઠિતાનિ તુ ।
મહાવૈશ્રણો દેવો યક્ષરાજો મહર્દ્ધિકઃ ॥ ૨૨૦॥

યક્ષકોટિપરીવારો યક્ષસઙ્ઘેન(યક્ષાસઙ્ખ્યેન) સંયુતઃ ।
મહાવિભવસમ્પન્નો હરપાદાર્ચને રતઃ ॥ ૨૨૧॥

હરધ્યાનૈકપરમો હરપાદનતોત્તમઃ ।
શાન્તિં કરોતુ મે નિત્યં પદ્મપત્રાયતેક્ષણઃ ॥ ૨૨૨॥

મણિભદ્રો મહાયક્ષો મણિરત્નવિભૂષણઃ ।
મનોહરેણ હારેણ કણ્ઠલગ્નેન રાજતે ॥ ૨૨૩॥

શિવધ્યાનરતો નિત્યં શિવપદાબ્જ પૂજકઃ ।

શાન્તિં કરોતુ મે નિત્યં સર્વદોષ નિવારણમ્ ॥ ૨૨૪॥

યક્ષિણીયક્ષકન્યાભિઃ પરિવારિતવિગ્રહઃ ।
રુદ્રાર્ચનપરો યુક્તઃ કરોતુ મમ શાન્તિકમ્ ॥ ૨૨૫॥

સુવીરો નામ યક્ષેન્દ્રો મણિકુણ્ડલભૂષિતઃ ।
ભાલેન હેમપટ્ટેન શોભનેન વિરાજતઃ ॥ ૨૨૬॥

બહુયક્ષસમાકીર્ણો યક્ષૈર્નમિતવિગ્રહઃ ।
શિવપૂજાપરો યુક્તઃ કરોતુ મમ શાન્તિકમ્ ॥ ૨૨૭॥

પઞ્જિકો નામ યક્ષેન્દ્રઃ કર્ણિકાકટકોજ્જ્વલઃ ।
હારેણ(મુકુટેન) સુવિચિત્રેણ કેયૂરાભ્યાં વિરાજિતઃ ॥ ૨૨૮॥

યક્ષસન્ઘૈઃ સમાયુક્તો યક્ષકોટિસમાવૃતઃ ।
હરાર્ચનપરઃ શ્રીમાન્ કરોતુ મમ શાન્તિકમ્ ॥ ૨૨૯॥

શ્રીમાન્વિભાણ્ડકો યક્ષો નાનારત્નવિભૂષિતઃ ।
ચારુણા કુણ્ડલેન્દ્રેણ કર્ણે નિત્યં વિરાજિતઃ ॥ ૨૩૦॥

યક્ષો યક્ષપતિર્દેવો યક્ષસેનાપતિર્બુધઃ ।
હરપાદાર્ચનરતઃ કરોતુ મમ શાન્તિકમ્ ॥ ૨૩૧॥

ધૃતરાષ્ટ્રો મહાતેજા યક્ષાધિપસમઃ પ્રભુઃ ।
દિવ્યપટ્ટાંશુકચ્છન્નો મણિકાઞ્ચનભૂષિતઃ ॥ ૨૩૨॥

શિવભક્તઃ શિવં ધ્યાત્વા શિવપૂજાપરાયણઃ ।
શિવપ્રસાદસમ્પન્નઃ કરોતુ મમ શાન્તિકમ્ ॥ ૨૩૩॥

પૂર્ણભદ્રો મહાયક્ષઃ સર્વાલઙ્કારભૂષિતઃ ।
રત્નપ્રદીપ્તપટ્ટેન હેમેનાઽતિપરિષ્કૃતઃ ॥ ૨૩૪॥ (var હૈમેનાતીવ રાજિતે ।)

યક્ષકોટિસહસ્રેણ પરિવારેણ સંસ્કૃતઃ । (var પરિવારિત વિગ્રહઃ ।)
રુદ્રપ્રણામપરમો રુદ્રભક્તિરતસ્સદા ॥ ૨૩૫॥

રુદ્રાર્ચનસમાયુક્તઃ કરોતુ મમ શાન્તિકમ્ ।
વિરૂપાક્ષશ્ચ યક્ષેન્દ્રઃ શ્વેતવાસા મહાદ્યુતિઃ ॥ ૨૩૬॥

ચારુકાઞ્ચનમાલાભિઃ કિઙ્કિણીરવકાન્વિતઃ ।
ભૂષિતશ્ચ મહાકાયો વરદાનૈકતત્પરઃ ॥ ૨૩૭॥

રુદ્રપૂજાપરો નિત્યં કરોતુ મમ શાન્તિકમ્ ।
અન્તરિક્ષગતા યક્ષાસ્તે યક્ષાઃ સ્વર્ગવાસિનઃ ॥ ૨૩૮॥

ગિરિકન્દરદુર્ગેષુ યે યક્ષા ભૂમિવાસિનઃ ।
પાતાલે યે સ્થિતા યક્ષાઃ શિવેપ્યન્તઃ સમાહિતાઃ ॥ ૨૩૯॥

નાનારૂપાઽઽયુધા યક્ષા નાનાભેષધરાસ્તથા ।
યોગૈશ્વર્યયુતાઃ સર્વે (શિવભક્તાઃ સુમનસઃ) શિવપૂજાસમુત્સુકાઃ ॥ ૨૪૦॥

શાન્તિં કુર્વન્તુ મે હૃષ્ટાઃ શાન્તાઃ શાન્તિપરાયણાઃ ।
યક્ષિણ્યો વિવિધાકારાસ્તથા યક્ષકુમારિકાઃ ॥ ૨૪૧॥

યક્ષકન્યા મહાભાગાઃ શિવપૂજાર્ચને રતાઃ ।
શાન્તિસ્વસ્ત્યયનં ક્ષેમં બલં કલ્યાણમુત્તમમ્ ॥ ૨૪૨॥

સિદ્ધિઞ્ચાઽઽશુ પ્રયચ્છન્તુ નિત્યમેવ સમાહિતાઃ ।
મેરુર્મન્દરકૈલાસૌ મલયો ગન્ધમાદનઃ ॥ ૨૪૩॥

શ્રીપર્વતો મહેન્દ્રશ્ચ હેમકૂટસ્તથૈવ ચ ।
પર્વતા સર્વતઃ સર્વે સર્વદા સુમહર્દ્ધિકાઃ ॥ ૨૪૪॥

શિવભક્તાઃ સદાકાલં ક્ષેમં કુર્વન્તુ મે સદા ।
જમ્બૂદ્વીપઃ પ્લક્ષદ્વીપઃ શાલ્મલીકુશદ્વીપકૌ ॥ ૨૪૫॥

ક્રૌઞ્ચદ્વીપઃ શાકદ્વીપો ગોમેદદ્વીપકો મહાન્ ।
પુષ્કરસ્તુ મહાદ્વીપ એતે દ્વીપા મહારુચઃ ॥ ૨૪૬॥

રુદ્રભક્તિરતાઃ સર્વે શાન્તિં કુર્વન્તુ મે સદા ।
ક્ષારક્ષીરોદકૌ ચૈવ દધ્યુદોઽથ ઘૃતોદકઃ ॥ ૨૪૭॥

સુરોદઃ સ્વાદુદશ્ચૈવ ઇક્ષુદકસ્તથૈવ ચ ।
સપ્તસમુદ્રનામાનઃ કુર્વન્તુ મમ શાન્તિકમ્ ॥ ૨૪૮॥

સાગરાઃ સરિતઃ સર્વાઃ સાગરાઃ સર્વતઃ સ્થિતાઃ ।
રુદ્રપૂજાપરાનિત્યં કુર્વન્તુ મમ શાન્તિકમ્ ॥ ૨૪૯॥

રાક્ષસાઃ સર્વતઃ સર્વે રાક્ષસા ઘોરરૂપિણઃ ।
રાક્ષસા યે મહાવીર્યા રાક્ષસાશ્ચ મહાબલાઃ ॥ ૨૫૦॥

સ્વર્ગં જલસ્થાનસ્થા યે તુ અન્તરિક્ષે તુ રાક્ષસાઃ ।
પાતાલે ભૂતલે યે ચ નિત્યં રુદ્રપરાયણાઃ ॥ ૨૫૧॥

શાન્તિં કુર્વન્તુ મે નિત્યં સતતં શિવભાવિતાઃ ।
ભૈરવં યસ્ય રૂપં તુ પ્રેતભસ્માઽવગુણ્ઠિતમ્ ॥ ૨૫૨॥ (var પ્રેમભસ્માઽવગુણ્ઠિતમ્)

તેજસા તસ્ય દેવસ્ય શાન્તિં કુર્વન્તુ મે સદા ।
નિત્યમુજ્જ્વલવેષેન યોગિન્યોઽથ મહાબલાઃ ॥ ૨૫૩॥

રુદ્રાણ્યો વિવિધાઽઽકારા ડાકિન્યશ્ચ મહર્દ્ધિકાઃ ।
રુદ્રપ્રણામનિરતા રુદ્રપૂજારતાઃ સદા ॥ ૨૫૪॥

રુદ્રેકાહિતચેતસ્કાઃ કુર્વન્તુ મમ શાન્તિકમ્ ।
અન્તરિક્ષગતાયાશ્ચ ડાકિન્યઃ સ્વર્ગસંસ્થિતાઃ ॥ ૨૫૫॥

પાતાલે ભૂતલે યાશ્ચ ગિરિદુર્ગેષુ યાઃ સ્થિતાઃ ।
તૃતીયં લોચનં યસ્ય ત્રિશૂલં ભસ્મ ભાસુરમ્ ॥ ૨૫૬॥

તેજસા તસ્ય દેવસ્ય શાન્તિં કુર્વન્તુ મે સદા ।
સર્વે ભૂતા મહારૂપાઃ સર્વે ભૂતા મહોજ્જ્વલાઃ ॥ ૨૫૭॥

સર્વે ભૂતાઃ સ્થિતાઃ સૌમ્યાઃ સર્વે ભૂતા મનોજવાઃ ।
અન્તરિક્ષે ચ યે ભૂતા યે ભૂતા દિવિ સંસ્થિતાઃ ॥ ૨૫૮॥

પાતાલે ભૂતલે યે તુ ભૂતા ભૂતવિધાયકાઃ(ભૂતિવિધાયિનઃ) ।
ખટ્વાઙ્ગં વિમલં યસ્ય ત્રિશૂલં કરપલ્લવે ॥ ૨૫૯॥

તેજસા તસ્ય દેવસ્ય શાન્તિં કુર્વન્તુ મે સદા ।
પ્રેતાઃ પ્રેતગણાઃ સર્વે યે પ્રેતાઃ સર્વતોમુખાઃ ॥ ૨૬૦॥

અતિદીપ્તાશ્ચ યે પ્રેતા યે પ્રેતા રુધિરાશનાઃ ।
અન્તરિક્ષે ચ યે પ્રેતાઃ યે પ્રેતાઃ સ્વર્ગવાસિનઃ ॥ ૨૬૧॥

પાતાલે ભૂતલે પ્રેતા યે પ્રેતાઃ કામરૂપિણઃ ।
સ્મશાને નિલયો યસ્ય વૃષભો યસ્ય વાહનમ્ (વાહનઃ) ॥ ૨૬૨॥

તેજસા તસ્ય દેવસ્ય શાન્તિ કુર્વન્તુ મે સદા ।
યે પિશાચા મહાવીર્યા ઋદ્ધિમન્તો મહાબલાઃ ॥ ૨૬૩॥

નાનારૂપધરાઃ સર્વે સર્વે ચ ગુણવિસ્તરાઃ ।
અન્તરિક્ષે પિશાચા યે સ્વર્ગે યે ચ પિશાચકાઃ ॥ ૨૬૪॥

ભૂ-પાતાલે પિશાચાશ્ચ બહુરૂપાઃ મહોજ્જ્વલાઃ ।

ચન્દ્રાર્ધં મસ્તકે યસ્ય ભસ્મં યસ્ય વિભૂષણમ્ ॥ ૨૬૫॥

તેજસા તસ્ય દેવસ્ય શાન્તિ કુર્વન્તુ મે સદા ।
અપસ્મારગ્રહાઃ સર્વે સર્વે ચાઽપિ જ્વરગ્રહાઃ ॥ ૨૬૬॥

ગર્ભબાલગ્રહા યે તુ નાનારોગગ્રહાશ્ચ યે ।
અન્તરિક્ષે ગ્રહા યે તુ સ્વર્ગે યે તુ ગ્રહોત્તમાઃ ॥ ૨૬૭॥

પાતાલે ભૂતલે યે ચ(તુ) યે ગ્રહાઃ સર્વતોદિશિ ।
કણ્ઠે યસ્ય મહાનીલં ભૂષણં યસ્ય પન્નગાઃ ॥ ૨૬૮॥

તેજસા તસ્ય દેવસ્ય શાન્તિં કુર્વન્તુ મે સદા ।
એતે દેવાદયઃ સર્વે શિવાઽઽજ્ઞાનુપધાયિનઃ ॥ ૨૬૯॥

કુર્વન્તુ જગતઃ શાન્તિં શિવભક્તાશ્ચ સર્વદા ।
જયાત્મયોગસંસ્થાય જય સંશુદ્ધચેતસે ॥ ૨૭૦॥

જય દાનૈકશૂરાય જયેશાય નમોઽસ્તુ તે ।
જયોત્તમાય દેવાય જય કલ્યાણદાયિને(કલ્યાણકીર્તયે) ॥ ૨૭૧॥

જય પ્રકટદેહાય જય જાપ્યાય(જપ્યાય) તે નમઃ ।
જય લક્ષ્મીનિવાસાય જય કાન્તિવિધાયિને ॥ ૨૭૨॥ (var લક્ષ્મીવિધાનાય)

જય વાક્યવિશુદ્ધાય અજિતાય નમો નમઃ ।
જય ત્રિશૂલહસ્તાય જય ખટ્વાઙ્ગધારિણે ॥ ૨૭૩॥

જય નિર્જિતલોકાય જય રૂપાય તે નમઃ ।
જય કાન્તાર્ધદેહાય જય ચન્દ્રાર્ધધારિણે ॥ ૨૭૪॥

જય દેવાધિવાસાય(દેવાધિદેવાય) જય રુદ્રાય તે નમઃ ।
જય ત્રિભુવનેશાય જય વિખ્યાતકીર્તયે (કલ્યાણકીર્તયે) ॥ ૨૭૫॥

જયાધારાય શર્વાય જય કર્ત્રે નમો નમઃ ।  (var જય સર્વાવધારાય)
જય મોક્ષપ્રદાત્રે ચ સૃષ્ટિસંહારકારિણે ॥ ૨૭૬॥

જય નિર્મલ દેહાય જય સર્વાર્થકારિણે ।
જય મન્મથનાશાય ઈશાનાય નમો નમઃ ॥ ૨૭૭॥

બ્રહ્મવિષ્ણ્વીશવન્ધ્યાય શિવશાન્તાય તે નમઃ ।
જય જાતવિશુદ્ધાય સર્વવ્યાપિન્નમોઽસ્તુ તે ॥ ૨૭૮॥

ઇત્યેવં શાન્તિકાધ્યાયં યઃ પઠેચ્છૃણુયાદઽપિ ।
સુધિયઃ સુખતાં યાન્તિ શિવલોકે મહીયતે ॥ ૨૭૯॥

(var વિધૂય સર્વપાપાનિ શિવલોકે મહીયતે ॥)
કન્યાર્થી લભતે કન્યાં જયકામૌ જયં લભેત્ ।
અર્થકામો લભેદર્થં પુત્રકામસ્તુ તાન્ બહૂન્ ॥ ૨૮૦॥

વિદ્યાર્થી લભતે વિદ્યાં યોગાર્થી યોગમાપ્નુયાત્ ।
ગર્ભિણી લભતે પુત્રં કન્યા વિન્દતિ સત્પતિમ્ ॥ ૨૮૧॥

યો યાન પ્રાર્થયતે કામાન્ માનવઃ શ્રવણાદિહ ।
તત્સર્વં શીઘ્રમાપ્નોતિ દેવાનાં ચ પ્રિયો ભવેત્ ॥ ૨૮૨॥

શાન્ત્યધ્યાયં પઠેદ્યસ્તુ સઙ્ગ્રામ પ્રવિશેન્નરઃ ।
સુનિર્જિત્યાઽઽહવે શત્રૂન્ કલ્યાણૈઃ પરિપૂર્યતે ॥ ૨૮૩॥

અક્ષય્યં મોદતે કાલમતિરસ્કૃતશાસનઃ ।
વ્યાધિભિર્નાભિભૂયેત પુત્રપૌત્રૈઃ પ્રતિષ્ઠિતઃ ॥ ૨૮૪॥

પાઠ્યમાનમિદં પુણ્યં યમુદ્દિશ્ય ચ પઠ્યતે ।
ન તસ્ય રોગા બાધન્તે વાતપિત્તાદિસમ્ભવાઃ ॥ ૨૮૫॥

નાઽકાલે મરણં તસ્ય ન સર્પૈશ્ચાઽપિ દંશ્યતે ।
ન વિષ ક્રમતે દેહે ન જડાન્ધત્વમૂકતા ॥ ૨૮૬॥

ન ચ સર્પભયં તસ્ય ન ચોત્પાતભયં ભવેત્ ।
નાઽભિચારકૃતૈર્દોષૈઃ લિપ્યતે સ કદાચન ॥ ૨૮૭॥

યત્પુણ્યં સર્વતીર્થાનાં ગઙ્ગાદીનાં વિશેષતઃ ।
તત્પુણ્યં કોટિગુણિતં પ્રાપ્નોતિ શ્રવણાદિહ ॥ ૨૮૮॥

યજ્ઞાનામશ્વમેધાનામગ્નિષ્ટોમશતસ્ય ચ ।
(var દશાનાં રાજસૂયાનાં અગ્નિષ્ટોમશતસ્ય ચ ।)
શ્રવણાત્ ફલમાપ્નોતિ કોટિકોટિગુણોત્તરમ્ ॥ ૨૮૯॥

અવધ્યઃ સર્વદેવાનાં (સર્વભૂતાનાં) અન્યેષાં ચ વિશેષતઃ ।
જીવેદ્વર્ષશતં સાગ્રં સર્વવ્યાધિવિવર્જિતઃ ॥ ૨૯૦॥

ગોઘ્નશ્ચૈવ કૃતઘ્નશ્ચ બ્રહ્મહા ગુરુતલ્પગઃ ।
શરણાગતઘાતી ચ મિત્રવિશ્વાસઘાતકઃ ॥ ૨૯૧॥

દુષ્ટપાપસમાચારો માતૃહા પિતૃહા તથા ।
શ્રવણાદસ્ય પાઠાદ્ વા મુચ્યતે સર્વપાતકૈઃ ॥ ૨૯૨॥

શાન્ત્યધ્યાયમિદં પુણ્યં ન દેયં યસ્ય કસ્યચિત્ ।
શિવભક્તાય દાતવ્યં શિવેન કથિતં પુરા ॥ ૨૯૩॥

નિત્યં ખચિતશક્તિશ્ચ શક્તિવ્યાઘાત વર્જિતઃ ।
(var નિત્યં ખચિતચિત્તઃ સ્યાચ્છક્તિવ્યાઘાત વર્જિતઃ ।)
સર્વકામ સમૃધ્દસ્તુ યઃ પઠેત દિને દિને ॥ ૨૯૪॥

॥ શિવધર્માખ્યે નન્દિકેશ્વરસંવાદે શાન્તિકાધ્યાયઃ શુભઃ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*ShantikadhyAya from Shivadharmakhya*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*